International Journal of Sanskrit Research 2022; 8(3): 17-20

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(3): 17-20
© 2022 IJSR
www.anantaajournal.com
Received: 19-03-2022
Accepted: 21-04-2022

**पि. श्रीकान्तः**
शोधच्छात्रः, शिक्षाविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत

**Corresponding Author:**
**पि. श्रीकान्तः**
शोधच्छात्रः, शिक्षाविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत

# उपलब्धिप्रस्तावः

**पि. श्रीकान्तः**

**सारांश**

आधुनिकसमाजे मनोविज्ञानशास्त्रस्य उपयोगिता बहुधा दृश्यते। विशिष्टतया एतस्य शास्त्रस्य आवश्यकतापि महती वर्तते। एतेनैव शिक्षाशास्त्रे अथवा अन्येषु विभागेषु च कार्यक्रमनिर्वहणे अभिलाषितफलितानि प्राप्तुं शक्यते। तत्र अधिगमविषये, बुद्धिविषये, व्यक्तित्वविषये च विशेषव्याख्या, लक्षणानि, सिद्धान्ताः, व्याख्या च बहवः बहुविधरीत्या प्रतिपादितवन्तः। परन्तु उपलब्धिविषये बहुन्यूनतया व्याख्या आगताः। अतोऽत्र उपलब्धिर्नाम कः, तस्य लक्षणानि, परिभाषाः, केषु केषु एतस्य प्रभावो विद्यते इति अग्रे विचारयामः।

**कूटशब्दः** समाजः, विज्ञानम्, उपलब्धिः, मनोविज्ञानम्

## प्रस्तावना

समाजेऽस्मिन् मानवः सर्वोत्कृष्टप्राणिः वर्तते। तस्य भाषणशैल्या आचारेण व्यवहारेण च सर्वविधप्राणिभ्यः भिन्नो दृश्यते। अस्य भिन्नरूपपरिणामस्य कारणं भवति जीवस्य बुद्धिशक्तिः। मानवः सहस्रवर्षेभ्यः पूर्वविद्वद्भिः ज्ञानमार्जयित्वा, पुनः तत्र प्राप्तज्ञानेन साकं नूतनज्ञानप्राप्तये स्वीयपरिश्रमं कुर्वन्तः सन्ति। तेन परिश्रमेण प्राप्तफलरूपज्ञानं परम्परानुसारेण स्वीयजनेभ्यः शिष्येभ्यश्च ददति स्म।

एतादृशप्रकृष्टरूपसाधनीभूतक्रिया एव शिक्षा इति कथ्यते पूर्वज्ञानिभिः। गुरुकुलाश्रमाः विद्यन्ते, यत्र गुरवः ज्ञानदातारः विद्यन्ते, शिष्याश्च ज्ञानस्वीकर्तारः वर्तन्ते, आनुकूलिकपरिस्थिति-व्यवस्थायाम्। तदानीं गुरुकेन्द्रिता भवति शिक्षाव्यवस्था।

परन्तु परिवर्तिनि काले गुरुकुलाश्रमव्यवस्थायाः स्थले विद्यालयाः, कलाशालाः, विश्वविद्यालयाः समागताः सन्ति। अत्र तु छात्रकेन्द्रिताः विद्यन्ते। यतो हि अत्र अध्यापकाः, शिष्याश्च परिलक्षितसमयं, पाठ्यांशरूपेण स्थितव्यवस्था प्रचलन्ती अस्ति। मुख्यतया अत्र विशिष्टोद्देश्यं वर्तते, छात्रस्य सर्वाङ्गीणविकासः।

शारीरिक, बौद्धिक, नागरिक, नैतिक, संवेगात्मकविकासाय निरन्तरं परिश्रमं करणीयं वर्तते। यदि विद्यालये बहवः छात्राः भवन्ति तर्हि तेषां सर्वेषां छात्राणां सर्वाङ्गीणविकासः कथमानेतुं शक्यते। तदर्थम् अध्यापकः कीदृशरूपेण उपायाः चिन्तनीयाः इत्यादिसर्वविधसमग्रचिन्तनस्य पथप्रदर्शनं करोति मनोविज्ञानम्। एतेन मनोविज्ञानेनैव उपरि उद्धृतांशानां समाधानं प्रकृष्टरूपेण प्राप्स्यते।

मनोविज्ञानम् इत्यस्य पदस्य आङ्ग्लभाषया Psychology इति पदं वर्तते। अस्य पदस्य रूपं ग्रीकभाषागतद्वाभ्यां पदाभ्यां निष्पन्नो वर्तते, Psyche यथा Logos इति। अत्र Psyche इत्यस्य पदस्य अर्थस्तु आत्मा इति, Logos इत्यस्य पदस्य अर्थः विज्ञानमिति। आहत्य Psychology इत्यस्य पदस्य आत्मनः विज्ञानमिति विशिष्टार्थो विज्ञायते।

पूर्वतनकाले मनोविज्ञानं दर्शनस्य अङ्गभूतत्वेन विराजितमस्ति। यतो हि मनोविज्ञानमित्यस्य आत्मनः विज्ञानमिति पूर्वोक्तपरिशीलनेन दार्शनिकाः आत्मनः स्वरूपविषये अध्ययनं कुर्वन्ति स्म। भारतीयदर्शनेषु पुराणेषु इतिहासेषु च आत्मनः विषयमाधारीकृत्य बहुविधरीत्या अध्ययनमकरोत्। परन्तु आधुनिकपरिवर्तिनि संसारे दर्शनग्रन्थेभ्यः मनोविज्ञानं पृथग्रीत्या विराजते। तत्र विशेषतया F. A. Lange महोदयः History of Materialism इत्यस्मिन् स्वकीयग्रन्थे Psychology इति शब्दस्य प्रप्रथमतया प्रयोगं कृतवान् 1866 तमे वर्षे। तावदारभ्य मनोविज्ञानशास्त्रम् आत्मन आधारभूतविज्ञानत्वेन परित्यत्त्वा

मानसिकव्यवहारपरिशीलनेन सङ्गृहीतो दृश्यते। मनोविज्ञानशास्त्रस्य विकासमार्गं एवंरीत्या दरीदृश्यते।

### आत्मनः विज्ञानम्

Psychology इत्यस्य शाब्दिकार्थं स्वीकृत्य प्राथमिकावस्थायां मनोविज्ञानस्य आत्मनः विज्ञानं मनोविज्ञानम् (The Science of Soul) इति उक्तवन्तः। तथापि दार्शनिकाः विषयेऽस्मिन् मतभेदान् प्रकटीकृताः। आत्मा अमूर्तपदार्थो वर्तते। आत्मा इन्द्रियैः ज्ञातपदार्थो न विद्यते। एवञ्च स्वरूपस्वभावविषये वक्तुं न शक्नुमः। अत उपर्युक्तवचनं तिरस्कृतवन्तः।

### मनसः विज्ञानम्

केचन विद्वांसः मनसः विज्ञानं मनोविज्ञानम् इति वाचं प्रकटीकृतवन्तः। अन्तःपरीक्षणपद्धत्या मनोरूपं विज्ञातुं शक्यते इति तेषां मतं वर्तते। पुनः तत्र मनः किं वर्तते ? कुत्र वर्तते ? तस्य कार्यं कथं वर्तते ? इत्यादिप्रश्नविशेषेषु वास्तविकोत्तरं न प्राप्तम्। आत्मा यथा विद्यते, एतन्मनोऽपि दृष्टिगोचरो न विद्यते। अतः एतदपि तिरस्कृता।

### चैतन्यस्य विज्ञानम्

चैतन्यस्य दशानां वर्णनं व्याख्यानञ्च करोति मनोविज्ञानमिति विलियम् जेम्सन् इत्यादयः प्रतिपादितवन्तः। मनसः चैतन्य-अचैतन्यावस्थयोः वर्णनं व्याख्यानञ्च कर्तुं प्रभवाम इति उक्तवन्तः। परन्तु गते काले महाशयः मनोविश्लेषणसिद्धान्तं प्रतिपादितवन्तः। तत्र अचेतनावस्थायाः वर्णनं, व्याख्या च कृता। परन्तु कालान्तरे Sigmand Freud महोदयेन मनोविश्लेषणसिद्धान्त-व्याख्यायाम् अचेतनावस्थायाः विस्तृतव्याख्या चकार। एतेन पूर्वोक्त परिभाषा नाङ्गीकृता।

### व्यवहारस्य विज्ञानम्

विंशतिशताब्दिप्रथमकाले J. B. Watson महोदयः मनोविज्ञानस्य व्यवहारवादसिद्धान्तं प्रतिपादितवन्तः। तेषां मते – व्यवहारस्य विज्ञानं मनोविज्ञानम् (It is possible to write a Psychology, to define it as the science of Behavior) इति व्याख्यां कृतवन्तः। अर्थात् प्रतिक्रियाः याः केनचिदुद्दीपकेन सम्बद्धाः भवन्ति तथा वस्तुनिष्ठतया तासां निरीक्षणं कर्तुं शक्यते इति।

अत्र मनोविज्ञानदृष्ट्या परीक्षणानि, सिद्धान्ताः, उपगमाः आविष्कृताः। एवमेव उपलब्धिविषये व्याख्यामिदानीं पश्यामः।

**उपलब्धिः**

प्राप्तज्ञानांश एव उपलब्धिरिति वदन्ति। वैयक्तिकज्ञानस्य, विचारस्य परीक्षणात् परं लभ्यमानस्वरूपमेव उपलब्धिः। छात्रस्य सर्वविषयकज्ञानं वर्षान्ते वा, यदा परीक्षणं क्रियते तदा तस्य ज्ञानस्य फलं कीयदिति ज्ञास्यामः, स एव उपलब्धिरिति विशेषज्ञैः प्रतिपादितं वर्तते।

एतादृशोपलब्धिं वयं शिक्षा, शिक्षणं, व्यक्तित्वं, बुद्धिः, अभिप्रेरणा इत्यादिविषयेषु अधिकतया एतेषां फलितानि द्रष्टुं शक्यते।

आधुनिकशिक्षाशास्त्रे उपलब्धेः अत्यन्तप्रमुखस्थानं प्रददाति। विशिष्टतया कस्यचन जनस्य सामर्थ्यनिर्धारणे अथवा योग्यताविषये शाश्वतरूपेण कुञ्चिका भवति उपलब्धिरिति विचारो दरीदृश्यते।

विशेषतया Crow & Crow महोदययोः लक्षणं वर्तते यत् – शिक्षाक्षेत्रे अधिगन्ता सूचनैः लाभान्वितो दृश्यते। ज्ञानप्रतिपादने प्रतिबिम्बरूपविस्तार उपलब्धिः छात्राय लभ्यते। सामान्यतया परीक्षाभिः आगतफलितानामाधारेण ज्ञानविस्तारः, नैपुण्यं साधयितुं शक्यते। विशेषतया व्यक्तित्वं (Personality), प्रेरणा (Motivation), अवकाशाः (Opportunities), शिक्षा (Education), शिक्षणम् (Training) इत्यादिविषयेषु उपलब्धिप्रभावो अधिकतया दृश्यते।

केषुचन विषयेषु च उपलब्धिप्रभावोऽधिकतया द्रष्टुं शक्यते।

**शैक्षिकविषये**

शिक्षकाणां सामर्थ्याम् (Teacher's Efficacy) सर्जनात्मकता (Creativity) सम्प्रेषणनैपुण्यानि (Communications) दृढविश्वासः (Confidence) शैक्षिककार्यक्रमाः (Educational Events) मूल्याङ्कनं (Evaluation) पुनर्बलनम् (Reinforcement) अभिप्रेरणा (Motivation) मातापित्रोः सहसम्बन्धः (Parents Relationship) प्रशंसादानं (Appreciation)

**सामाजिकक्षेत्रे**

वार्तापत्रिकापठनं (Newspaper Reading) ग्रन्थालय उपयोगिता (Library Usage) समाचार-सम्प्रेषणतकिनिकी (Information & Communication Technology) तकिनिकी आधारितबोधनविधयः (Technical based Teaching Methods)

एवञ्च प्रतिकूलप्रभावं जनयितुमपि केचनांशाः विद्यन्ते। ते यथा - चित्राणि (Cinemas) अन्तर्जालं (Internet) दृश्यक्रीडाः (Video Games) दूरदर्शन अधिकवीक्षणम् (Watching excess time T.V) इति।

**व्यक्तिगताशाः**

पर्याप्तनिद्रा (Insufficient Sleep) आरोग्यस्थितिः (Health Condition) पितृणां शैक्षिकयोग्यता (Parental Education Qualification) विषयच्छात्रप्रावीण्यता (Proficiency of Students in Subject) समविद्या (Peer Education) आत्मगौरवम् (Self-Respect)

प्रतिकूलाशाः। एते यथा –

मनोव्याधिसमस्याः (Psychiatric Problems) आत्मविरोधः (Self-conflict) दिनस्वाप्नं (Day Dreaming) प्रेमव्यवहाराः (Love Affairs) खाद्य अभिरुचयः (Eating Habits) मनोव्याकुलता (Frustration) कुटुम्बपृष्ठभूमिका (Family Background) पितृणाम् असहायता (Parents Un support),

**स्वीय-अवकाशाः**

शुद्धवातावरणं (Clean Environment) ग्रन्थालयः (Library) अन्तर्जालव्यवस्था (Internet Access) आर्थिकसहायता (Financial Support), उपकारवेतनं (Scholarship) अनुकूलकक्ष्याः (Comfortable Classes) प्रगमनसहायता (Transport Facilities) शैक्षिकधनसहायता (Educational Loan)

**मार्गदर्शनम्**

मार्गदर्शने छात्रसहायकक्रियाः, व्यक्तगतसमुचितमार्गदर्शनम् एवं परामर्शक्रियाः, जीवितम् एवम् उच्चशिक्षा, यौवनावस्थानां समस्यापरिष्कारः, छात्रसमस्या अवगमनम् इत्याद्यंशा उपलब्धिं अभिवर्धयति। एते अंशाः छात्रावासे स्थित – अस्थितच्छात्राणामपि वर्तन्ते।

**उपसंहारः**

एवंरीत्या मनोविज्ञानशास्त्रमाधारीकृत्य यत्किमपि वा भवतु तस्य प्रयोजनं भवत्येव। प्रयोजनरूपफलमेव उपलब्धिरित्युच्यते। प्रत्येकं व्यक्तेः मानसिक, आर्थिकाभिवृद्धिं विना सफलता न दृश्यते। व्यक्तिसम्बद्धज्ञानं, अभिरुचयः, व्यवहारश्च विशिष्टतया भूमिकां पोषयति। एतादृशमहद्विशिष्टगुणाः जीवनाभिवृद्धेः साहाय्यतां दास्यन्ति।

यस्य कस्यापि सिद्धान्तस्य, परीक्षणस्य परीक्षणात्परं तस्य फलितानि आगतानि भवन्ति। एतेन व्यक्तेः उपलब्धिः कियानिति ज्ञातुं शक्यते। यदि उपलब्धिरधिको भवति, तत्र इतोऽपि विशिष्टतया तस्य छात्रस्य अभिवृद्धिं चिन्तयितुं शक्यते। यदि उपलब्धिर्न्यूनो विद्यते। तत्र कारणानि अन्विष्य, उपायान् रचयित्वा तस्य वृद्धिं जनयिष्यामः।

**सन्दर्भसूची**

1. शिक्षायाः मनोवैज्ञानिकाधाराः – डा.बी. पद्ममिश्रश्रीनिवासः।
2. शिक्षा मनोविज्ञानम् – पि. नागमुनिरेड्डि
3. उच्चतरमनोविज्ञानम् – एस्. पि. गुप्ता
4. अन्तर्जालम्
5. www.educationalpsychology.com
6. www.education.smarttech.com